# श्रीमद् भागवत रसिक कुटुंब

## ॥ श्री जगन्नाथसप्तकम् ॥

प्रकाशकान्तचिन्मयं(म्) प्रसन्नदारुविग्रहं(म्),
प्रफुल्लफुल्लसुन्दरं(म्) पुरीप्रमोदमन्दिरम् ।
विषाणुसङ्घशोषिणं(वँ) विशालवैद्यघोषिनं(म्),
सहास्यगोललोचनं(म्) महाप्रभुं(म्) भजाम्यहम् ॥ 1॥

परम्पराविमण्डितं(न्) तटे वटे मठे रतं(म्),
महाप्रसादमज्जितं(म्) महानुभावसज्जितम् ।
सुवर्णकीर्णनिर्जितं(म्) समन्दमन्दहासितं(म्),
पहण्डिनृत्यपण्डितं(ञ्) जगद्गुरुं(म्) भजाम्यहम् ॥ 2॥

त्रितापपापनाशकं(न्) त्रिधातुदोषघातकं(म्),
सुपञ्चभूतशोधकं(वँ) विषाणुवेगरोधकम् ।
नितान्तशान्तिदायकं(म्) महार्तिनाशकारकं(म्),
सदा जगत्सुरक्षकं(म्) महाप्रभुं(म्) भजाम्यहम् ॥ 3॥

रथे कदापि सत्वरं(वँ) विचित्रवीर्यमीश्वरं(म्),

मुखारविन्दसुन्दरं(म्) सगद्गदं(म्) सुधारसम् ।
महापुराणसत्करं(म्) महेश्वरीपुरः(स्)सरं(म्)
सघोषहर्षतत्परं(म्) सदाशिवं(म्) भजाम्यहम् ॥ 4॥

निवासनीलपर्वतं(म्) प्रफुल्लपीतसत्पटं(म्),
समस्तवैष्णवाश्रितं(म्) समुद्रकूलनिर्जितम् ।
नितान्तशान्तचिद्घनं(ङ्) घनाघनप्रभायुतं(न्),
नियन्तृरोगभौतिकं(म्) भिषग्वरं(म्) भजाम्यहम् ॥ 5॥

ग्रहेशदर्पहारिणं(ङ्) खगेशयानचारिणं(न्),
नृशं(म्)स-कं(म्)समर्दनं(म्) समस्तगोपशासनम् ।
सरागराधिकाधवं(ङ्) कृपालुनीलमाधवं(न्),
नवीनयौवनोज्वलं(म्) भजे निचोलमुज्ज्वलम् ॥ 6॥

नियोगभोगभक्षणं(वँ) वियोगवेगमर्षणं(म्) ,
सुपुष्पहारधारिणं(ञ्) चराचरस्य पारिणम् ।
समन्त्रतन्त्रनायकं(म्) प्रवीणवेणुवादकं(वँ),
विषाणुमुक्तिदायकं(म्) भजे सुखप्रदायकम् ॥ 7॥

इति प्रदीप्तनन्दशर्मविरचितं(म्) श्रीजगन्नाथसप्तकं(म्) सम्पूर्णम् ।